श्री शिव स्तोत्रं (हिमालय कृतं)

श्री शिव स्तोत्रं (हिमालय कृतं)

हिमालय उवाच |
त्वं ब्रह्मा सृष्टिकर्ता च त्वं विष्णुः परिपालकः |
त्वं शिवः शिवदोऽनंतः सर्वसंहारकारकः || 1 ||

त्वमीश्वरो गुणातीतो ज्योतीरूपः सनातनः |
प्रकृतः प्रकृतीशश्च प्राकृतः प्रकृतेः परः || 2 ||

नानारूपविधाता त्वं भक्तानां ध्यानहेतवे |
येषु रूपेषु यत्प्रीतिस्तत्तद्रूपं बिभर्षि च || 3 ||

सूर्यस्त्वं सृष्टिजनक आधारः सर्वतेजसां |
सोमस्त्वं सस्यपाता च सततं शीतरश्मिना || 4 ||

वायुस्त्वं वरुणस्त्वं च त्वमग्निः सर्वदाहकः |
इंद्रस्त्वं देवराजश्च काले मृत्युर्यमस्तथा || 5 ||

मृत्युंजयो मृत्युमृत्युः कालकालो यमांतकः |
वेदस्त्वं वेदकर्ता च वेदवेदांगपारगः || 6 ||

विदुषां जनकस्त्वं च विद्वांश्च विदुषां गुरुः |
मंत्रस्त्वं हि जपस्त्वं हि तपस्त्वं तत्फलप्रदः || 7 ||

वाक्त्वं वागधिदेवस्त्वं तत्कर्ता तद्गुरुः स्वयं |
अहो सरस्वतीबीजं कस्त्वां स्तोतुमिहेश्वरः || 8 ||

इत्येवमुक्त्वा शैलेंद्रस्तस्थौ धृत्वा पदांबुजं |
तदोवाच तमाबोध्य चावरुह्य वृषाच्छिवः || 9 ||

स्तोत्रमेतन्महापुण्यं त्रिसंध्यं यः पठेन्नरः |
मुच्यते सर्वपापेभ्यो भयेभ्यश्च भवार्णवे || 10 ||

अपुत्रो लभते पुत्रं मासमेकं पठेद्यदि |
भार्याहीनो लभेद्भार्यां सुशीलां सुमनोहरां || 11 ||

चिरकालगतं वस्तु लभते सहसा ध्रुवं |
राज्यभ्रष्टो लभेद्राज्यं शंकरस्य प्रसादतः || 12 ||

कारागारे श्मशाने च शत्रुग्रस्तेऽतिसंकटे |
गभीरेऽतिजलाकीर्णे भग्नपोते विषादने || 13 ||

रणमध्ये महाभीते हिंस्रजंतुसमन्विते |
सर्वतो मुच्यते स्तुत्वा शंकरस्य प्रसादतः || 14 ||

इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे अष्टत्रिंशोऽध्याये हिमालयकृत शिवस्तोत्रं |